# Shri Panchastavi

# ધર્માચાર્યકૃતા શ્રીપઞ્ચસ્તવી

## Document Information

Text title : Panchastavi (laghu, charchA, ghaTa, ambA, sakalajananI)

File name : panchastavI.itx

Category : devii, devI, dashamahAvidyA, panchaka, sangraha

Location : doc_devii

Proofread by : NA

Latest update : October 11, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# ધર્માચાર્યકૃતા શ્રીપઞ્ચસ્તવી

પઞ્ચાનાં સ્તવાનાં સમાહારા - A collection of five eulogiums

૧. લઘુસ્તવઃ ।
૨. ચર્ચાસ્તવઃ ।
૩. ઘટસ્તવઃ ।
૪. અમ્બાસ્તવઃ ।
૫. સકલજનનીસ્તવઃ ।

॥ શ્રીઃ ॥

શ્રીગણેશાય નમઃ ।
શ્રીગુરુભ્યો નમઃ ।
ૐ નમસ્ત્રિપુરસુન્દર્યૈ ।

## અથ લઘુસ્તવઃ પ્રથમઃ ।

(શ્રી બાલાવિંશતિસ્તવઃ અથવા શ્રીબાલાલઘુસ્તવરાજઃ લઘુસ્તવઃ ઇત્યપિ નામાન્તરમ્ ।)

ઐન્દ્રસ્યેવ શરાસનસ્ય દધતી મધ્યેલલાટં પ્રભાં
શૌક્લીં કાન્તિમનુષ્ણગોરિવ શિરસ્યાતન્વતી સર્વતઃ ।
એષાઽસૌ ત્રિપુરા હૃદિ દ્યુતિરિવોષ્ણાંશોઃ સદાહઃ સ્થિતા
છિન્દ્યાન્નઃ સહસા પદૈસ્ત્રિભિરઘં જ્યોતિર્મયી વાઙ્મયી ॥ ૧॥

યા માત્રા ત્રપુસીલતાતનુલસત્તન્તૂત્થિતિસ્પર્ધિની
વાગ્બીજે પ્રથમે સ્થિતા તવ સદા તાં મન્મહે તે વયમ્ ।
શક્તિઃ કુણ્ડલિનીતિ વિશ્વજનનવ્યાપારબદ્ધોદ્યમાં
જ્ઞાત્વેત્થં ન પુનઃ સ્પૃશન્તિ જનની ગર્ભેઽર્ભકત્વં નરાઃ ॥ ૨॥

દૃષ્ટ્વા સંભ્રમકારિ વસ્તુસહસા ઐ ઐ ઇતિ વ્યાહૃતં
યેનાઽકૂતવશાદઽપીહ વરદે ! બિન્દું વિનાપ્યક્ષરમ્ ।

તસ્યાપિ ધ્રુવમેવ દેવિ તરસા જાતે તવાનુગ્રહે
વાચઃસૂક્તિસુધારસદ્રવમુચો નિર્યાન્તિ વક્ત્રામ્બુજાત્ ॥ ૩॥

યન્નિત્યે તવ કામરાજમપરં મન્ત્રાક્ષરં નિષ્કલં
તત્સારસ્વતમિત્યવૈતિ વિરલઃ કશ્ચિદ્બુધશ્ચેદ્ભુવિ ।
આખ્યાનં પ્રતિપર્વ સત્યતપસો યત્કીર્તયન્તો દ્વિજાઃ
પ્રારમ્ભે પ્રણવાસ્પદપ્રણયિતાં નીત્વોચ્ચરન્તિ સ્ફુટમ્ ॥ ૪॥

યત્સદ્યો વચસાં પ્રવૃત્તિકરણે દૃષ્ટપ્રભાવં બુધૈઃ
તાર્તીયીકમહં નમામિ મનસા ત્વદ્બીજમિન્દુપ્રભમ્ ।
અસ્ત્વૌર્વોઽપિ સરસ્વતીમનુગતો જાડ્યામ્બુવિચ્છિત્તયે
ગૌઃ શબ્દો ગિરિ વર્તતે સનિયતં યોગં વિના સિદ્ધિદઃ ॥ ૫॥

એકૈકં તવ દેવિ બીજમનઘં સવ્યઞ્જનાઽવ્યઞ્જનં
કૂટસ્થં યદિ વા પૃથક્ ક્રમગતં યદ્વા સ્થિતં વ્યુત્ક્રમાત્ ।
યં યં કામમપેક્ષ્ય યેન વિધિના કેનાપિ વા ચિન્તિતં
જપ્તં વા સફલીકરોતિ સહસા તં તં સમસ્તં નૃણામ્ ॥ ૬॥

વામે પુસ્તકધારિણીમભયદાં સાક્ષસ્રજં દક્ષિણે
ભક્તેભ્યો વરદાનપેશલકરાં કર્પૂરકુન્દોજ્જ્વલામ્ ।
ઉજ્જૃમ્ભામ્બુજપત્રકાન્તિનયનસ્નિગ્ધપ્રભાલોકિનીં
યે ત્વામમ્બ ન શીલયન્તિ મનસા તેષાં કવિત્વં કુતઃ ॥ ૭॥

યે ત્વાં પાણ્ડુરપુણ્ડરીકપટલસ્પષ્ટાભિરામપ્રભાં
સિઞ્ચન્તીમમૃતદ્રવૈરિવ શિરો ધ્યાયન્તિ મૂર્ધ્નિ સ્થિતામ્ ।
અશ્રાન્તં વિકટસ્ફુટાક્ષરપદા નિર્યાન્તિ વક્ત્રામ્બુજાત્
તેષાં ભારતિ ભારતી સુરસરિત્કલ્લોલલોલોર્મિવત્ ॥ ૮॥

યે સિન્દૂરપરાગપુઞ્જપિહિતાં ત્વત્તેજસા દ્યામિમા-
મુર્વીં ચાપિ વિલીનયાવકરસપ્રસ્તારમગ્નામિવ ।
પશ્યન્તિ ક્ષણમપ્યનન્યમનસસ્તેષામનઙ્ગજ્વર-
ક્લાન્તાસ્ત્રસ્તકુરઙ્ગશાવકદૃશોવશ્યાઃ ભવન્તિ સ્ફુટમ્ ॥ ૯॥

ચઞ્ચત્કાઞ્ચનકુણ્ડલાઙ્ગદધરામાબદ્ધકાઞ્ચીસ્રજં
યે ત્વાં ચેતસિ તદ્ગતેક્ષણમપિ ધ્યાયન્તિ કૃત્વા સ્થિરામ્ ।
તેષાં વેશ્મસુ વિભ્રમાદહરહઃ સ્ફારીભવન્ત્યશ્ચિરમ્ ।
માદ્યત્કુઞ્જરકર્ણતાલતરલાઃ સ્થૈર્યં ભજન્તે શ્રિયઃ ॥ ૧૦॥

આર્ભટ્યાશશિખણ્ડમણ્ડિતજટાજૂટાં નૃમુણ્ડસ્રજં
બન્ધૂકપ્રસવારુણામ્બરધરાં પ્રેતાસનાધ્યાસિનીમ્ । variation કુસુમારુણા
ત્વાં ધ્યાયન્તિ ચતુર્ભુજાં ત્રિનયનામાપીનતુઙ્ગસ્તનીં
મધ્યે નિમ્નવલિત્રયાઙ્કિતતનું ત્વદ્રૂપસંવિત્તયે ॥ ૧૧॥

જાતોઽપ્યૢઽલ્પપરિચ્છદે ક્ષિતિભુજાં સામાન્યમાત્રે કુલે
નિઃશેષાવનિચક્રવર્તિપદવીં લબ્ધ્વા પ્રતાપોન્નતઃ ।
યદ્વિદ્યાધર વૃન્દવન્દિતપદઃ શ્રીવત્સરાજોઽભવત્
દેવિ ત્વચ્ચરણામ્બુજ પ્રણતિજઃ સોઽયં પ્રસાદોદયઃ ॥ ૧૨॥

ચણ્ડિ ત્વચ્ચરણામ્બુજાર્ચનવિધૌ બિલ્વીદલોલ્લુણ્ઠન-
ત્રુટ્યત્કણ્ટકકોટિભિઃ પરિચયં યેષાં ન જગ્મુઃ કરાઃ ।
તે દણ્ડાઙ્કુશચક્રચાપકુલિશશ્રીવત્સમત્સ્યાઙ્કિતૈ-
ર્જાયન્તે પૃથિવીભુજઃ કથમિવામ્ભોજપ્રભૈઃ પાણિભિઃ ॥ ૧૩॥

વિપ્રાઃ ક્ષોણિભુજો વિશસ્તદિતરે ક્ષીરાજ્યમધ્વાસવૈઃ ।
ત્વાં દેવિ ત્રિપુરે પરાપરમયીં સન્તર્પ્ય પૂજાવિધૌ ।
યાં યાં પ્રાર્થયતે મનઃ સ્થિરધિયાં તેષાં ત એવ ધ્રુવં
તાં તાં સિદ્ધિમવાપ્નુવન્તિ તરસા વિઘ્નૈરવિઘ્નીકૃતાઃ ॥ ૧૪॥

શબ્દાનાં જનની ત્વમત્ર ભુવને વાગ્વાદિનીત્યુચ્યસે
ત્વત્તઃ કેશવવાસવ પ્રભૃતયોઽપ્યાવિર્ભવન્તિ સ્ફુટમ્ ।
લીયન્તે ખલુ યત્ર કલ્પવિરમે બ્રહ્માદયસ્તેઽપ્યમી
સા ત્વં કાચિદચિન્ત્યરૂપમહિમા શક્તિઃ પરા ગીયસે ॥ ૧૫॥

દેવાનાં ત્રિતયં ત્રયી હુતભુજાં શક્તિત્રયં ત્રિસ્વરા-
સ્ત્રૈલોક્યં ત્રિપદી ત્રિપુષ્કરમથો ત્રિબ્રહ્મ વર્ણાસ્ત્રયઃ ।
યત્કિઞ્ચિજ્જગતિ ત્રિધા નિયમિતં વસ્તુ ત્રિવર્ગાત્મકં
તત્સર્વં ત્રિપુરેતિ નામ ભગવત્યન્વેતિ તે તત્ત્વતઃ ॥ ૧૬॥

લક્ષ્મી રાજકુલે જયાં રણભિવિ ક્ષેમઙ્કરીમધ્વનિ
ક્રવ્યાદદ્વિપસર્પભાજિ શવરીં કાન્તારદુર્ગે ગિરૌ ।
ભૂતપ્રેતપિશાચજમ્બુકભયે સ્મૃત્વા મહાભૈરવીં
વ્યામોહે ત્રિપુરાં તરન્તિ વિપદસ્તારાઞ્ચ તોયપ્લવે ॥ ૧૭॥

માયા કુણ્ડલિની ક્રિયા મધુમતી કાલી કલા માલિની

માતઙ્ગી વિજયા જયા ભગવતી દેવી શિવા શામ્ભવી ।
શક્તિઃ શઙ્કરવલ્લભા ત્રિનયના વાગ્વાદિની ભૈરવી
હ્રિઙ્કારી ત્રિપુરા પરાપરમયી માતા કુમારીત્યસિ ॥ ૧૮॥

આઈપલ્લવિતૈપરસ્પરયુતૈર્દ્વિત્રિક્રમાદ્યક્ષરૈઃ
કાદ્યૈઃ ક્ષાન્તગતૈઃ સ્વરાદિભિરથો ક્ષાન્તૈશ્ચ તૈઃ સસ્વરૈઃ ।
નામાનિ ત્રિપુરે ભવન્તિ ખલુ યાન્યત્યન્તગુહ્યાનિ તે
તેભ્યો ભૈરવપત્નિ વિંશતિસહસ્રેભ્યઃ પરેભ્યો નમઃ ॥ ૧૯॥

બોદ્ધવ્યા નિપુણં બુધૈઃ સ્તુતિરિયં કૃત્વા મનસ્તદ્ગતં
ભારત્યાસ્ત્રિપુરેત્યનન્યમનસો યત્રાદ્યવૃત્તે સ્ફુટમ્ ।
એકદ્વિત્રિપદક્રમેણ કથિતસ્તત્પાદ સઙ્ખ્યાક્ષરૈ-
ર્મન્ત્રોદ્ધારવિધિર્વિશેષસહિતઃ સત્સંપ્રદાયાન્વિતઃ ॥ ૨૦॥

સાવદ્યં નિરવદ્યમસ્તુ યદિ વા કિં વાનયા ચિન્તયા
નૂનં સ્તોત્રમિદં પઠિષ્યતિ જનો યસ્યાસ્તિ ભક્તિસ્ત્વયિ ।
સઞ્ચિન્ત્યાપિ લઘુત્વમાત્મનિ દૃઢં સઞ્જાયમાનં હઠાત્
ત્વદ્ભક્ત્યા મુખરીકૃતેન રચિતં યસ્માન્મયાપિ સ્ફુટમ્ ॥ ૨૧॥

ઇતિ શ્રીધર્માચાર્યકૃતૌ શ્રી પઞ્ચસ્તવ્યાં લઘુસ્તવઃ પ્રથમઃ સમાપ્તઃ । ૧

## અથ ચર્ચાસ્તવો દ્વિતીયઃ ।

ૐ નમસ્ત્રિપુરસુન્દર્યૈ ।
આનન્દસુન્દરપુરન્દરમુક્તમાલ્યં
મૌલૌ હઠેન નિહિતં મહિષાસુરસ્ય ।
પાદામ્બુજં ભવતુ મે વિજયાય મઞ્જુ-
મઞ્જીરશિઞ્જિતમનોહરમમ્બિકાયાઃ ॥ ૧॥

સૌન્દર્યવિભ્રમભુવો ભુવનાધિપત્ય-
સમ્પત્તિકલ્પતરવસ્ત્રિપુરે! જયન્તિ ।
એતે કવિત્વકુમદપ્રકરાવબોધ-
પૂર્ણેન્દવસ્ત્વયિ જગજ્જનનિ પ્રણામાઃ ॥ ૨॥

દેવિ ! સ્તુતિવ્યતિકરે કૃતબુદ્ધયસ્તે
વાચસ્પતિ પ્રભૃતયોઽપિ જડી ભવન્તિ ।

તસ્માન્નિસર્ગજડિમા કતમોઽહમત્ર
સ્તોત્રરૂં તવ ત્રિપુરતાપનપત્નિ ! કર્તુમ્ ॥ ૩॥

માતસ્તથાપિ ભવતીં ભવતીવ્રતાપ-
વિચ્છિત્તયે સ્તુતિમહાર્ણવ કર્ણધારઃ ।
સ્તોતું ભવાનિ સ ભવચ્ચરણારવિન્દ-
ભક્તિગ્રહઃ કિમપિ માં મુખરી કરોતિ ॥ ૪॥

સૂતે જગન્તિ ભવતી ભવતી બિભર્તિ
જાગર્તિ તત્ક્ષયકૃતે ભવતી ભવાનિ ।
મોહં ભિનત્તિ ભવતી ભવતી રુણદ્ધિ
લીલાયિતં જયતિ ચિત્રમિદં ભવત્યાઃ ॥ ૫॥

યસ્મિન્મનાગપિ નવામ્બુજપત્રગૌરિ!
ગૌરિ! પ્રસાદમધુરાં દૃશમાદધાસિ ।
તસ્મિન્નિરન્તરમનઙ્ગશરાવકીર્ણ-
સીમન્તિનીનયનસન્તતયઃ પતન્તિ ॥ ૬॥

પૃથ્વીભુજોઽપ્યુદયનપ્રવરસ્ય તસ્ય
વિદ્યાધર પ્રણતિ ચુમ્બિત પાદ પીઠઃ ।
યચ્ચક્રવર્તિપદવીપ્રણયઃ સ એષ (સ એવ)
ત્વત્પાદપઙ્કજરજઃ કણજઃ પ્રસાદઃ ॥ ૭॥

કલ્પદ્રુમપ્રસવકલ્પિતચિત્રપૂજા-
મુદ્દીપિત પ્રિયતમામદરક્તગીતિમ્ ।
નિત્યં ભવાનિ! ભવતીમુપવીણયન્તિ
વિદ્યાધરાઃ કનકશૈલ ગુહાગૃહેષુ ॥ ૮॥

લક્ષ્મીવશીકરણકર્મણિકામિનીના-
માકર્ષણવ્યતિકરેષુ ચ સિદ્ધમન્ત્રઃ ।
નીરન્ધ્રમોહતિમિરચ્છિદુરપ્રદીપો
દેવિ! ત્વદઙ્ઘ્રિજનિતો જયતિ પ્રસાદઃ ॥ ૯॥

દેવિ! ત્વદઙ્ઘ્રનખરત્નભુવો મયૂખાઃ
પ્રત્યગ્રમૌક્તિકરુચો મુદમુદ્વહન્તિ ।
સેવાનતિવ્યતિકરે સુરસુન્દરીણાં
સીમન્તસીમ્નિ કુસુમસ્તવકાયિતં યૈઃ ॥ ૧૦॥

મૂર્ધ્નિ સ્ફુરત્તુહિનદીધિતિદીપ્તિદીપ્તં
મધ્યે લલાટમમરાયુધરશ્મિચિત્રમ્ ।
હૃચ્ચક્રચુમ્બિ હુતભુક્કણિકાનુરૂપં
જ્યોતિર્યદેતદિદમમ્બ! તવ સ્વરૂપમ્ ॥ ૧૧॥

રૂપં તવ સ્ફુરિતચન્દ્રમરીચિગૌર-
મામ્લોકતે શિરસિ વાગધિદૈવતં યઃ ।
નિઃસીમસૂક્તિરચનામૃતનિર્ભરસ્ય
તસ્ય પ્રસાદમધુરાઃ પ્રસરન્તિ વાચઃ ॥ ૧૨॥

સિન્દૂરપાંસુપટલચ્છુરિતામિવ દ્યાં
ત્વત્તેજસા જતુરસસ્નપિતામિવોર્વીમ્ ।
યઃ પશ્યતિ ક્ષણમપિ ત્રિપુરે! વિહાય
વ્રીડાં મૃડાનિ! સુદૃશસ્તમનુદ્રવન્તિ ॥ ૧૩॥

માતર્મુહૂર્તમપિ યઃ સ્મરતિ સ્વરૂપં
લાક્ષારસપ્રસરતન્તુનિભં ભવત્યાઃ ।
ધ્યાયન્ત્યનન્યમનસસ્તમનઙ્ગતપ્તાઃ
પ્રદ્યુમ્નસીમ્નિ સુભગત્વગુણં તરુણ્યઃ ॥ ૧૪॥

યોઽયં ચકાસ્તિ ગગનાર્ણવરત્નમિન્દુ-
ર્યોઽયં સુરાસુરગુરુઃ પુરુષઃ પુરાણઃ ।
યદ્વામમર્ધમિદમન્ધકસૂદનસ્ય
દેવિ! ત્વમેવ તદિતિ પ્રતિપાદયન્તિ ॥ ૧૫॥

ઇચ્છાનુરૂપમનુરૂપગુણપ્રકર્ષં
સઙ્કર્ષિણિ ! ત્વમનુસૃત્ય યદા વિભર્ષિ ।
જાયેત સ ત્રિભુવનૈક ગુરુસ્તદાનીં
દેવઃ શિવોઽપિ ભુવનત્રયસૂત્રધારઃ ॥ ૧૬॥

રુદ્રાણિ ! વિદ્રુમમયીં પ્રતિમામિવ ત્વાં
યે ચિન્તયન્ત્યરુણકાન્તિમઽનન્યરૂપામ્ ।
તાનેત્ય પક્ષ્મલદૃશઃ પ્રસભં ભજન્તે
કણ્ઠાવસક્તમૃદુબાહુલતાસ્તરુણ્યઃ ॥ ૧૭॥

ત્વદ્રૂપમુલ્લસિતદાડિમપુષ્પરક્ત-

મુદ્ભાવયેન્મદનદૈવતમક્ષરં યઃ ।
તં રૂપહીનમપિ મન્મથનિર્વિશેષ-
માલોકયન્ત્યુરુનિતમ્બભરાસ્તરુણ્યઃ ॥ ૧૮॥
ધ્યાતાઽસિ હૈમવતિ! યેન હિમાંશુરશ્મિ-
માલાઽમલદ્યુતિરકલ્મષ માનસેન ।
તસ્યાઽવિલમ્બમનવદ્યમનલ્પકલ્પ-
મલ્પૈર્દિનૈઃ સૃજસિ સુન્દરિ! વાગ્વિલાસમ્ ॥ ૧૯॥

આધારમારુતનિરોધવશેન યેષાં
સિન્દૂરરઞ્જિતસરોજગુણાનુકારિ ।
દીપ્તં હૃદિ સ્ફુરતિ દેવિ! વપુસ્ત્વદીયં (તીવ્રં હૃદિ)
ધ્યાયન્તિ તાનિહ સમીહિતસિદ્ધસાધ્યાઃ ॥ ૨૦॥

ત્વામૈન્દવીમિવ કલામનુભાલદેશ-
મુદ્ભાસિતામ્બરતલામવલોકયન્તઃ ।
સદ્યો ભવાનિ! સુધિયઃ કવયો ભવન્તિ
ત્વં ભાવનાહિતધિયાં કુલ કામધેનુઃ ॥ ૨૧॥

ત્વાં વ્યાપિનીતિ સમના ઇતિ કુણ્ડલીતિ
ત્વાં કામિનીતિ કમલેતિ કલાવતીતિ ।
ત્વાં માલિનીતિ લલિતેત્યપરાજિતેતિ
દેવિ! સ્તુવન્તિ વિજયેતિ જયેત્યુમેતિ ॥ ૨૨॥

યે ચિન્તયન્ત્યરુણમણ્ડલમધ્યવર્તિ
રૂપં તવામ્બ! નવયાવકપઙ્કપિઙ્ગમ્ ।
તેષાં સદૈવ કુસુમાયુધબાણભિન્ન-
વક્ષઃસ્થલા મૃગદૃશો વશગા ભવન્તિ ॥ ૨૩॥

ઉત્તપ્તહેમરુચિરે ત્રિપુરે! પુનીહિ
ચેતશ્ચિરન્તનમઘૌઘવનં લુનીહિ ।
કારાગૃહે નિગડબન્ધનપીડિતસ્ય
ત્વત્સંસ્મૃતૌ ઝટિતિ મે નિગડાસ્ત્રુટન્તુ ॥ ૨૪॥

શર્વાણિ! સર્વજનવન્દિતપાદપદ્મે!
પદ્મચ્છદચ્છવિવિડમ્બિતનેત્રલક્ષ્મિ! ।
નિષ્પાપમૂર્તિ જનમાનસરાજહંસિ!

હંસિ ત્વમાપદમનેકવિધાં જનસ્ય ॥ ૨૫॥

ત્વત્પાદપઙ્કજરજઃ પ્રણિપાતપૂતૈઃ
પુણ્યૈરનલ્પમતિભિઃ કૃતિભિઃ કવીન્દ્રૈઃ ।
ક્ષીરક્ષપાકરદુકૂલહિમાવદાતા
કૈરપ્યવાપિ ભુવનત્રિતયેઽપિ કીર્તિઃ ॥ ૨૬॥

ત્વદ્રૂપૈકનિરૂપણપ્રણયિતાબન્ધો દૃશોસ્ત્વદ્ગુણ-
ગ્રામાકર્ણનરાગિતા શ્રવણયોસ્ત્વત્સંસ્મૃતિશ્ચેતસિ ।
ત્વત્પાદાર્ચનચાતુરી કરયુગે ત્વત્કીર્તનં વાચિ મે
કુત્રાપિ ત્વદુપાસનવ્યસનિતા મે દેવિ! મા શામ્યતુ ॥ ૨૭॥

ઉદ્દામકામપરમાર્થસરોજષણ્ડ-
ચણ્ડદ્યુતિર્દ્યુતિમુપાસિતષટ્પ્રકારામ્ ।
મોહદ્વિપેન્દ્રકદનોદ્યતબોધસિંહ-
લીલાગુહાં ભગવતીં ત્રિપુરાં નમામિ ॥ ૨૮॥

ગણેશવટુકસ્તુતા રતિસહાયકામાન્વિતા
સ્મરારિવરવિષ્ટરા કુસુમબાણબાણૈર્યુતા ।
અનઙ્ગકુસુમાદિભિઃ પરિવૃતા ચ સિદ્ધૈસ્ત્રિભિઃ
કદમ્બવનમધ્યગા ત્રિપુરસુન્દરી પાતુ નઃ ॥ ૨૯॥

યઃ સ્તોત્રમેતદનુવાસરમીશ્વરાયાઃ
શ્રેયસ્કરં પઠતિ વા યદિવા શૃણોતિ ।
તસ્યેપ્સિતં ફલતિ રાજભિરીડ્યતેઽસૌ
જાયેત સ પ્રિયતમો હરિણેક્ષણાનામ્ ॥ ૩૦॥

બ્રહ્મેન્દ્રરુદ્રહરિચન્દ્રસહસ્રરશ્મિ-
સ્કન્દદ્વિપાનનહુતાશમવન્દિતાયૈ ।
વાગીશ્વરિ! ત્રિભુવનેશ્વરિ! વિશ્વમાત-
રન્તર્બહિશ્ચ કૃતસંસ્થિતયે નમસ્તે ॥ ૩૧॥

ઇતિ શ્રીધર્માચાર્યકૃતૌ શ્રી પઞ્ચસ્તવ્યાં ચર્ચાસ્તવો દ્વિતીયઃ સમાપ્તઃ । ૨

# અથ તૃતીયો ઘટસ્તવઃ ।

ૐ

દેવિ! ત્ર્યમ્બકપત્નિ! પાર્વતિ સતિ! ત્રૈલોક્યમાતઃ! શિવે!
શર્વાણિ! ત્રિપુરે! મૃડાનિ વરદે! રુદ્રાણિ! કાત્યાયિનિ! ।
ભીમે! ભૈરવિ !ચણ્ડિ! શર્વરિ! કલે! કાલક્ષયે શૂલિનિ!
ત્વત્પાદપ્રણતાનઽનન્યમનસઃ પર્યાકુલાન્પાહિનઃ ॥ ૧॥

ઉન્મત્તા ઇવ સગ્રહા ઇવ વિષવ્યાસક્તમૂર્છા ઇવ
પ્રાપ્તપ્રૌઢમદા ઇવાતિ વિરહગ્રસ્તા ઇવાર્તા ઇવ ।
યે ધ્યાયન્તિ હિ શૈલરાજતનયાં ધન્યાસ્ત એકાગ્રત-
સ્ત્યક્તોપાધિવિવૃદ્ધરાગમનસો ધ્યાયન્તિ વામભ્રુવઃ ॥ ૨॥

દેવિ! ત્વાં સકૃદેવ યઃ પ્રણમતિ ક્ષોણીભૃતસ્તં નમ-
ન્ત્યાજન્મસ્ફુરદઙ્ઘ્રિપીઠવિલુઠત્કોટીરકોટિચ્છટાઃ ।
યસ્ત્વામર્ચતિ સોઽર્ચ્યતે સુરગણૈર્યઃ સ્તૌતિ સ સ્તૂયતે
યસ્ત્વાં ધ્યાયતિ તં સ્મરાર્તિવિધુરા ધ્યાયન્તિ વામભ્રુવઃ ॥ ૩॥

ધ્યાયન્તિ યે ક્ષણમપિ ત્રિપુરે! હૃદિ ત્વાં
લાવણ્યયૌવનધનૈરપિ વિપ્રયુક્તાઃ ।
તે વિસ્ફુરન્તિ લલિતાયતલોચનાનાં
ચિત્તૈકભિત્તિલિખિતપ્રતિમાઃ પુમાંસઃ ॥ ૪॥

એતં કિં નુ દૃશા પિબામ્યુત વિશામ્યસ્યાઙ્ગમઙ્ગૈર્નિજૈઃ
કિં વામુ નિગલામ્યનેન સહસા કિં વૈકતામાશ્રયે ।
તસ્યેત્થં વિવશો વિકલ્પઘટનાકૂતેન યોષિજ્જનઃ
કિં તદ્યન્ન કરોતિ દેવિ! હૃદયે યસ્ય ત્વમાવર્તસે ॥ ૫॥

વિશ્વવ્યાપિનિ યદ્વદીશ્વર ઇતિ સ્થાણાવનન્યાશ્રયઃ
શબ્દઃ શક્તિરિતિ ત્રિલોકજનનિ! ત્વય્યેવ તથ્યસ્થિતિઃ ।
ઇત્થં સત્યપિ શક્નુવન્તિ યદિમાઃ ક્ષુદ્રા રુજો બાધિતું
ત્વદ્ભક્તાનઽપિ ન ક્ષિણોષિ ચ રુષા તદ્દેવિ! ચિત્રં મહત્ ॥ ૬॥

ઇન્દોર્મધ્યગતાં મૃગાઙ્કસદૃશચ્છાયાં મનોહારિણી
પાણ્ડૂત્ફુલ્લસરોરુહાસનગતા સ્નિગ્ધપ્રદીપચ્છવિમ્ ।
વર્ષન્તીમમૃતં ભવાનિ! ભગવતીં ધ્યાયન્તિ યે દેહિન-
સ્તે નિર્મુક્તરુજો ભવન્તિ વિપદઃ પ્રોજ્ઝન્તિ તાન્દૂરતઃ ॥ ૭॥

પૂર્ણેન્દોઃ શકલૈરિવાતિબહલૈઃ પીયૂષપૂરૈરિવ
ક્ષીરાબ્ધેર્લહરીભરૈરિવ સુધાપઙ્કસ્ય પિણ્ડૈરિવ ।
પ્રાલેયૈરિવ નિર્મિતં તવ વપુર્ધ્યાયન્તિ યે શ્રદ્ધયા
ચિત્રાન્તર્નિહતાર્તિતાપવિપદસ્તે સમ્પદં બિભ્રતિ ॥ ૮॥

યે સંસ્મરન્તિ તરલાં સહસોલ્લસન્તીં
ત્વાં ગ્રન્થિપઞ્ચકભિદં તરુણાર્કશોણામ્ ।
રાગાર્ણવે બહલરાગિણિ મજ્જયન્તીં
કૃત્સ્નં જગદ્દધતિ ચેતસિ તાન્મૃગાક્ષ્યઃ ॥ ૯॥

લાક્ષારસસ્નપિતપઙ્કજતન્તુતન્વી-
મન્તઃ સ્મરત્યનુદિનં ભવતીં ભવાનિ ।
યસ્તં સ્મરપ્રતિમમપ્રતિમસ્વરૂપા
નેત્રોત્પલૈર્મૃગદૃશો ભૃશમર્ચયન્તિ ॥ ૧૦॥

સ્તુમસ્ત્વાં વાચમવ્યક્તાં હિમકુન્દેન્દુરોચિષમ્ ।
કદમ્બમાલાં બિભ્રાણામાપાદતલલમ્બિનીમ્ ॥ ૧૧॥

મૂર્ધ્નીન્દોઃ સિતપઙ્કજાસનગતાં પ્રાલેયપાણ્ડુત્વિષં
વર્ષન્તીમમૃતં સરોરુહભુવો વક્ત્રેઽપિ રન્ધ્રેઽપિ ચ ।
અચ્છિન્ના ચ મનોહરા ચ લલિતા ચાતિપ્રસન્નાપિ ચ
ત્વામેવ સ્મરતાં સ્મરારિદયિતે ! વાક્ સર્વતો વલ્ગતિ ॥ ૧૨॥

દદાતીષ્ટાન્ભોગાન્ક્ષપયતિ રિપૂન્હન્તિ વિપદો
દહત્યાધીન્વ્યાધીઞ્છમયતિ સુખાનિ પ્રતનુતે ।
હઠાદન્તર્દુઃખં દલયતિ પિનષ્ટીષ્ટવિરહં
સકૃદ્ધ્યાતા દેવી કિમિવ નિરવદ્યં ન કુરુતે ॥ ૧૩॥

યસ્ત્વાં ધ્યાયતિ વેત્તિ વિન્દતિ જપત્યાલોકતે ચિન્તય-
ત્યન્વેતિ પ્રતિપદ્યતે કલયતિ સ્તૌત્યાશ્રયત્યર્ચતિ ।
યશ્ચ ત્ર્યમ્બકવલ્લભે! તવ ગુણાનાકર્ણયત્યાદરા-
ત્તસ્ય શ્રીર્ન ગૃહાદપૈતિ વિજયસ્તસ્યાગ્રતો ધાવતિ ॥ ૧૪॥

કિં કિં દુઃખં દનુજદલિનિ! ક્ષીયતે ન સ્મૃતાયાં
કા કા કીર્તિઃ કુલકમલિનિ! ખ્યાપ્યતે ન સ્તુતાયામ્ ।
કા કા સિદ્ધિઃ સુરવરનુતે! પ્રાપ્યતે નાર્ચિતાયાં

કં કં યોગં ત્વયિ ન ચિનુતે ચિત્તમાલમ્બિતાયામ્ ॥ ૧૫॥

યે દેવિ! દુર્ધરકૃતાન્તમુખાન્તરસ્થા
યે કાલિ! કાલઘનપાશનિતાન્ત બદ્ધાઃ ।
યે ચણ્ડિ! ચણ્ડગુરુકલ્મષસિન્ધુમગ્ના-
સ્તાન્ત્રાસિ મોચયસિ તારયસિ સ્મૃતૈવ ॥ ૧૬॥

લક્ષ્મીવશીકરણચૂર્ણસહોદરાણિ
ત્વત્પાદપઙ્કજરજાંસિ ચિરં જયન્તિ ।
યાનિ પ્રણામમિલિતાનિ નૃણાં લલાટે
લુમ્પતિ દૈવલિખિતાનિ દુરક્ષરાણિ ॥ ૧૭॥

રે મૂઢાઃ! કિમયં વૃથૈવ તપસા કાયઃ પરિક્લિશ્યતે
યજ્ઞૈર્વા બહુદક્ષિણૈઃ કિમિતરે રિક્તીક્રિયન્તે ગૃહાઃ ।
ભક્તિશ્ચેદવિનાશિની ભગવતીપાદદ્વયી સેવ્યતા-
મુન્નિદ્રામ્બુરુહાતપત્રસુભગા લક્ષ્મીઃ પુરો ધાવતિ ॥ ૧૮॥

યાચે ન કઞ્ચન ન કઞ્ચન વઞ્ચયામિ
સેવે ન કઞ્ચન નિરસ્તસમસ્તદૈન્યઃ ।
શ્લક્ષ્ણં વસે મધુરમદ્મિ ભજે વરસ્ત્રી-
દેવી હૃદિ સ્ફુરતિ મે કુલકામધેનુઃ ॥ ૧૯॥

શબ્દબ્રહ્મમયિ! સ્વચ્છે દેવિ ત્રિપુરસુન્દરિ! ।
યથાશક્તિ જપં પૂજાં ગૃહાણ પરમેશ્વરિ ॥ ૨૦॥

નન્દન્તુ સાધકાઃ સર્વે વિનશ્યન્તુ વિદૂષકાઃ ।
અવસ્થા શામ્ભવી મેઽસ્તુ પ્રસન્નોઽસ્તુ ગુરુઃ સદા ॥ ૨૧॥

દર્શનાત્પાપશમની જપાન્મૃત્યુવિનાશિની ।
પૂજિતા દુઃખદૌર્ભાગ્યહરા ત્રિપુરસુન્દરી ॥ ૨૨॥

નમામિ યામિનીનાથલેખાલઙ્કૃતકુન્તલામ્ ।
ભવાનીં ભવસન્તાપનિર્વાપણસુધાનદીમ્ ॥ ૨૩॥

મન્ત્રહીનં ક્રિયાહીનં વિધિહીનં ચ યદ્ગતમ્ ।
ત્વયા તત્ક્ષમ્યતાં દેવિ! કૃપયા પરમેશ્વરિ! ॥ ૨૪॥

ઇતિ શ્રીધર્માચાર્યકૃતૌ શ્રી પઞ્ચસ્તવ્યાં ઘટસ્તવઃ તૃતીયઃ સમાપ્તઃ । ૩

## અથ પઞ્ચસ્તવ્યામમ્બાસ્તવશ્ચતુર્થઃ ।

ૐ યામામનન્તિ મુનયઃ પ્રકૃતિં પુરાણીં
વિદ્યેતિ યાં શ્રુતિરહસ્યવિદોવદન્તિ ।
તામર્ધપલ્લવિતશઙ્કરરૂપમુદ્રાં
દેવીમનન્યશરણઃ શરણં પ્રપદ્યે ॥ ૧॥

અમ્બ! સ્તવેષુ તવ તાવદકર્તુકાણિ
કુણ્ઠીભવન્તિ વચસામપિ ગુમ્ફનાનિ ।
ડિમ્બસ્ય મે સ્તુતિરસાવડસમઞ્જસાપિ
વાત્સલ્યનિઘ્નહૃદયાં ભવતીં ધિનોતિ ॥ ૨॥

વ્યોમેતિ બિન્દુરિતિ નાદ ઇતીન્દુલેખા-
રૂપેતિ વાગ્ભવતનૂરિતિ માતૃકેતિ ।
નિઃષ્યન્દમાનસુખબોધસુધાસ્વરૂપા
વિદ્યોતસે મનસિ ભાગ્યવતાં જનાનામ્ ॥ ૩॥

આવિર્ભવત્પુલકસન્તતિભિઃ શરીરૈ-
ર્નિઃષ્યન્દમાનસલિલૈર્નવનેશ્ચ નિત્યમ્ ।
વાગ્ભિશ્ચ ગદ્ગદપદાભિરુપાસતે યે
પાદૌ તવામ્બ! હૃદયેષુ ત એવ ધન્યાઃ ॥ ૪॥

વક્ત્રં યદુદ્યતમભિષ્ટુતયે ભવત્યા-
સ્તુભ્યં નમો યદપિ દેવિ! શિરઃ કરોતિ ।
ચેતશ્ચ યત્ત્વયિ પરાયણમમ્બ! તાનિ
કસ્યાપિ કૈરપિ ભવન્તિ તપોવિશેષૈઃ ॥ ૫॥

મૂલાલવાલકુહરાદુદિતા ભવાનિ!
નિર્ભિદ્ય ષટ્સરસિજાનિ તડિલ્લતેવ ।
ભૂયોઽપિ તત્ર વિશસિ ધ્રુવમણ્ડલેન્દુ-
નિઃષ્યન્દમાનપરમામૃતતોયરૂપા ॥ ૬॥

દગ્ધં યદા મદનમેકમનેકધા તે
મુગ્ધઃ કટાક્ષવિધિરઙ્કુરયાઞ્ચકાર ।
ધત્તે તદા પ્રભૃતિ દેવિ! લલાટનેત્રં

સત્યં હ્રિયેવ મુકુલીકૃતમિન્દુમૌલિઃ ॥ ૭॥

અજ્ઞાતસમ્ભવમનાકલિતાન્વવાયં
ભિક્ષું કપાલિનમવાસસમદ્વિતીયમ્ ।
પૂર્વં કરગ્રહણમઙ્ગલતો ભવત્યાઃ
શમ્ભું ક એવ બુબુધે ગિરિરાજકન્યે ॥ ૮॥

ચર્મામ્બરં ચ શવભસ્મવિલેપનં ચ
ભિક્ષાટનં ચ નટનં ચ પરેતભૂમૌ ।
વેતાલસંહતિપરિગ્રહતા ચ શમ્ભોઃ
શોભાં બિભર્તિ ગિરિજે! તવ સાહચર્યાત્ ॥ ૯॥

કલ્પોપસંહરણકેલિષુ પણ્ડિતાનિ
ચણ્ડાનિ ખણ્ડપરશોરપિ તાણ્ડવાનિ ।
આલોકનેન તવ કોમલિતાનિ માત-
ર્લાસ્યાત્મના પરિણમન્તિ જગદ્વિભૂત્યૈ ॥ ૧૦॥

જન્તોરપશ્ચિમતનોઃ સતિ કર્મસામ્યે
નિઃશેષપાશપટલચ્છિદુરા નિમેષાત્ ।
કલ્યાણિ દૈશિકકટાક્ષસમાશ્રયેણ
કારુણ્યતો ભવસિ શામ્ભવવેદદીક્ષા ॥ ૧૧॥

મુક્તાવિભૂષણવતી નવવિદ્રુમાભા
યચ્ચેતસિ સ્ફુરસિ તારકિતેવ સન્ધ્યા ।
એકઃ સ એવ ભુવનત્રયસુન્દરીણાં
કન્દર્પતાં વ્રજતિ પઞ્ચશરી વિનાપિ ॥ ૧૨॥

યે ભાવયન્ત્યમૃતવાહિભિરંશુજાલૈ-
રાપ્યાયમાનભુવનામમૃતેશ્વરીં ત્વામ્ ।
તે લઙ્ઘયન્તિ નનુ માતરલઙ્ઘનીયાં
બ્રહ્માદિભિઃ સુરવરૈરપિ કાલકક્ષ્યામ્ ॥ ૧૩॥

યઃ સ્ફાટિકાક્ષગુણપુસ્તકકુણ્ડિકાઢ્યાં
વ્યાખ્યાસમુદ્યતકરાં શરદિન્દુશુભ્રામ્ ।
પદ્માસનાં ચ હૃદયે ભવતીમુપાસ્તે
માતઃ સ વિશ્વકવિતાર્કિકચક્રવર્તી ॥ ૧૪॥

બર્હાવતંસયુતબર્બરકેશપાશાં
ગુઞ્જાવલીકૃતઘનસ્તનહારશોભામ્ ।
શ્યામાં પ્રવાલવદનાં સુકુમારહસ્તા
ત્વામેવ નૌમિ શવરીં શવરસ્ય જાયામ્ ॥ ૧૫॥

અર્ધેન કિં નવલતાલલિતેન મુગ્ધે!
ક્રીતં વિભોઃ પરુષમર્ધમિદં ત્વયેતિ ।
આલીજનસ્ય પરિહાસવચાંસિ મન્યે
મન્દસ્મિતેન તવ દેવિ! જડી ભવન્તિ ॥ ૧૬॥

બ્રહ્માણ્ડ બુદ્બુદકદમ્બકસઙ્કુલોઽયં
માયોદધિર્વિવિધદુઃખતરઙ્ગમાલઃ ।
આશ્ચર્યમમ્બ! ઝટિતિ પ્રલયં પ્રયાતિ
ત્વદ્ધ્યાનસન્તતિમહાવડવામુખાગ્નૌ ॥ ૧૭॥

દાક્ષાયણીતિ કુટિલેતિ ગુહારણીતિ
કાત્યાયનીતિ કમલેતિ કલાવતીતિ ।
એકા સતી ભગવતી પરમાર્થતોઽપિ
સંદૃશ્યસે બહુવિધા નનુ નર્તકીવ ॥ ૧૮॥

આનન્દલક્ષણમનાહતનામ્નિ દેશે
નાદાત્મના પરિણતં તવ રૂપમીશે ।
પ્રત્યઙ્મુખેન મનસા પરિચીયમાનં
શંસન્તિ નેત્રસલિલૈઃ પુલકૈશ્ચ ધન્યાઃ ॥ ૧૯॥

ત્વં ચન્દ્રિકા શશિનિ તિગ્મરુચૌ રુચિસ્ત્વં
ત્વં ચેતનાસિ પુરુષે પવને બલં ત્વમ્ ।
ત્વં સ્વાદુતાસિ સલિલે શિખિનિ ત્વમૂષ્મા
નિઃસારમેવ નિખિલં ત્વદૃતે યદિ સ્યાત્ ॥ ૨૦॥

જ્યોતીંષિ યદ્દિવિ ચરન્તિ યદન્તરિક્ષં
સૂતેપયાંસિ યદહિર્ધરણીં ચ ધત્તે ।
યદ્વાતિ વાયુરનલોયદુદર્ચિરાસ્તે
તત્સર્વમમ્બ! તવ કેવલમાજ્ઞયૈવ ॥ ૨૧॥

સઙ્કોચમિચ્છસિ યદા ગિરિજે! તદાનીં
વાક્તર્કયોસ્ત્વમસિ ભૂમિરનામરૂપા ।

યદ્વા વિકાસમુપયાસિ યદા તદાનીં
ત્વન્નામરૂપગણનાઃ સુકરીભવન્તિ ॥ ૨૨॥

ભોગાય દેવિ ભવતીં કૃતિનઃ પ્રણમ્ય
ભ્રૂકિઙ્કરીકૃતસરોજગૃહા સહસ્રાઃ ।
ચિન્તામણિપ્રચયકલ્પિતકેલિશૈલે
કલ્પદ્રુમોપવન એવ ચિરં રમન્તે ॥ ૨૩॥

હન્તું ત્વમેવ ભવસિ ત્વદધીનમીશે
સંસારતાપમખિલં દયયા પશૂનામ્ ।
વૈકર્તનીકિરણસંહતિરેવ શક્તા
ધર્મે નિજં શમયિતું નિજયૈવ વૃષ્ટ્યા ॥ ૨૪॥

શક્તિઃ શરીરમધિદૈવતમન્તરાત્મા
જ્ઞાનં ક્રિયા કરણમાસનજાલમિચ્છા ।
ઐશ્વર્યમાયતનમાવરણાનિ ચ ત્વં
કિં તન્ન યદ્ભવસિ દેવિ શશાઙ્કમૌલેઃ ॥ ૨૫॥

ભૂમૌ નિવૃત્તિરુદિતા પયસિ પ્રતિષ્ઠા
વિદ્યાઽનલે મરુતિ શાન્તિરતીતશાન્તિઃ ।
વ્યોમ્નીતિ યાઃ કિલ કલાઃ કલયન્તિ વિશ્વં
તાસાં વિદૂરતરમમ્બ !પદં ત્વદીયમ્ ॥ ૨૬॥

યાવત્પદં પદસરોજયુગં ત્વદીયં
નાઙ્ગીકરોતિ હૃદયેષુ જગચ્છરણ્યે ।
તાવદ્વિકલ્પ જટિલાઃ કુટિલપ્રકારા-
સ્તર્કગ્રહાઃ સમયિનાં પ્રલયં ન યાન્તિ ॥ ૨૭॥

યદ્દેવયાનપિતૃયાનવિહારમેકે
કૃત્વા મનઃ કરણમણ્ડલસાર્વભૌમમ્ ।
યાને નિવેશ્ય તવ કારણપઞ્ચકસ્ય
પર્વાણિ પાર્વતિ નયન્તિ નિજાસનત્વમ્ ॥ ૨૮॥

શૂલાસુ મૂર્તિષુ મહીપ્રમુખાસુ મૂર્તેઃ
કસ્યાશ્ચનાપિ તવ વૈભવમમ્બ યસ્યાઃ ।
પત્યા ગિરામપિ ન શક્યતે એવ વક્તું
સાસિ સ્તુતા કિલ મયેતિ તિતિક્ષિતવ્યમ્ ॥ ૨૯॥

કાલાગ્નિકોટિરુચિમમ્બ ષડધ્વશુદ્ધૌ-
વાપ્લાવનેષુ ભવતીમમૃતૌઘવૃષ્ટિમ્ ।
શ્યામાં ઘનસ્તનતટાં સકલીકૃતૌ ચ
ધ્યાયન્ત એવ જગતાં ગુરવો ભવન્તિ ॥ ૩૦॥

વિદ્યાં પરાં કતિચિદમ્બરમમ્બ કેચિ-
દાનન્દમેવ કતિચિત્કતિચિચ્ચ માયામ્ ।
ત્વાં વિશ્વમાહુરપરે વયમામનામ
સાક્ષાદપારકરુણાં ગુરુમૂર્તિમેવ ॥ ૩૧॥

કુવલયદલનીલમ્ બર્બરસ્નિગ્ધકેશં
પૃથુતરકુચભારાક્રાન્તકાન્તાવલગ્નમ્ ।
કિમિહ બહુભિરુક્તૈસ્ત્વત્સ્વરૂપં પરં નઃ
સકલભુવનમાતઃ સન્તતં સન્નિધત્તામ્ ॥ ૩૨॥

ઇતિ શ્રીધર્માચાર્યકૃતૌ શ્રી પઞ્ચસ્તવ્યાં અમ્બાસ્તવઃ ચતુર્થઃ સમાપ્તઃ । ૪

## અથ સકલજનનીસ્તવઃ પઞ્ચમઃ ।

ૐ અજાનન્તો યાન્તિ ક્ષયમવશમન્યોન્યકલહૈ-
રમી માયાગ્રન્થૌ તવ પરિલુઠન્તઃ સમયિનઃ ।
જગન્માતર્જન્મજ્વરભયતમઃ કૌમુદિ! વયં
નમસ્તે કુર્વાણાઃ શરણમુપયામો ભગવતીમ્ ॥ ૧॥

વચસ્તર્કાગમ્યસ્વરસપરમાનન્દવિભવ-
પ્રબોધાકારાય દ્યુતિતુલિતનીલોત્પલરુચે ।
શિવસ્યારાધ્યાય સ્તનભરવિનમ્રાય સતતં
નમો યસ્મૈ કસ્મૈચન ભવતુ મુગ્ધાય મહસે ॥ ૨॥

લુઠદ્ગુઞ્જાહારસ્તનભરનમન્મધ્યલતિકા-
મુદઞ્ચદ્ઘર્મામ્ભઃ કણગુણિતનીલોત્પલરુચમ્ ।
શિવં પાર્થત્રાણપ્રવણમૃગયાકારગુણિતં
શિવામન્વગ્યાન્તીં શવરમહમન્વેમિ શવરીમ્ ॥ ૩॥

મિથઃ કેશાકેશિપ્રધનનિધનાસ્તર્કઘટના

બહુશ્રદ્ધાભક્તિપ્રણયવિષયાશ્વાસ્રવિધયઃ ।
પ્રસીદ પ્રત્યક્ષીભવ ગિરિસુતે! દેહિ શરણં
નિરાલમ્બં ચેતઃ પરિલુઠતિ પારિપ્લવમિદમ્ ॥ ૪॥

શુનાં વા વહ્નેર્વા ખગપરિષદો વા યદશનં
કદા કેન ક્વેતિ ક્વચિદપિ ન કશ્ચિત્કલયતિ ।
અમુષ્મિન્વિશ્વાસં વિજહિહિમમાહ્નાય વપુષિ
પ્રપદ્યેથાશ્ચેતઃ સકલજનનીમેવ શરણમ્ ॥ ૫॥

અનાદ્યન્તાભેદપ્રણયરસિકાપિ પ્રણયિની
શિવસ્યાસીર્યત્ત્વં પરિણયવિધૌ દેવિ! ગૃહિણી ।
સવિત્રી ભૂતાનામપિ યદુદભૂઃ શૈલતનયા
નદેતત્સંસારપ્રણયનમહાનાટકસુખમ્ ॥ ૬॥

બ્રુવન્ત્યેકે તત્ત્વં ભગવતિ સદન્યે વિદુરસ-
ત્પરે માતઃ! પ્રાહુસ્તવ સદસદન્યે સુકવયઃ ।
પરે નૈતત્સર્વં સમભિદધતે દેવિ! સુધિય-
સ્તદેતત્ત્વન્માયાવિલસિતમશેષં નનુ શિવે! ॥ ૭॥

તડિત્કોટિજ્યોતિર્દ્યુતિદલિતષડ્ગ્રન્થિગહનં
પ્રવિષ્ટં સ્વાધારં પુનરપિ સુધાવૃષ્ટિવપુષા ।
કિમપ્યષ્ટાત્રિંશત્કિરણસકલીભૂતમનિશં
ભજે ધામ શ્યામં કુચભરનતં બર્બરકચમ્ ॥ ૮॥

ચતુષ્પત્રાન્તઃ ષડ્દલભગપુટાન્તસ્ત્રિવલય-
સ્ફુરદ્વિદ્યુદ્વહ્નિદ્યુમણિનિયુતાભદ્યુતિયુતે ।
ષડશ્રં ભિત્ત્વાદૌ દશદલમથ દ્વાદશદલં
કલાશ્રં ચ દ્વ્યશ્રં ગતવતિ! નમસ્તે ગિરિસુતે! ॥ ૯॥

કુલં કેચિત્પ્રાહુર્વપુરકુલમન્યે તવ બુધાઃ
પરે તત્સમ્ભેદં સમભિદધતે કૌલમપરે ।
ચતુર્ણામપ્યેષામુપરિ કિમપિ પ્રાહુરપરે
મહામાયે! તત્ત્વં તવ કુથમમી નિશ્ચિનુમહે ॥ ૧૦॥

ષડધ્વારણ્યાનીં પ્રલયરવિકોટિપ્રતિરુચા
રુચા ભસ્મીકૃત્ય સ્વપદકમલપ્રહ્વશિરસામ્ ।
વિતન્વાનઃ શૈવં કિમપિ વપુરિન્દીવરરુચિઃ

કુચાભ્યામાનમ્રઃ શિવપુરુષકારો વિજયતે ॥ ૧૧॥

પ્રકાશાનન્દાભ્યામવિદિતચરીં મધ્યપદવીં
પ્રવિશ્યૈતદ્દ્વન્દ્વં રવિશશિસમાખ્યં કવલયન્ ।
પ્રવિશ્યોર્ધ્વં નાદં લયદહનભસ્મીકૃતકુલઃ
પ્રસાદાત્તે જન્તુઃ શિવમકુલમમ્બ! પ્રવિશતિ ॥ ૧૨॥

પ્રિયઙ્ગુશ્યામાઙ્ગીમરુણતરવાસઃ કિસલયાં
સમુન્મીલન્મુક્તાફલબહુલનેપથ્યકુસુમામ્ ।
સ્તનદ્વન્દ્વસ્ફારસ્તબકનમિતાં કલ્પલતિકાં
સકૃદ્ધ્યાયન્તસ્ત્વાં દધતિ શિવચિન્તામણિ પદમ્ ॥ ૧૩॥

ષડાધારાવર્તૈરપરિમિતમન્ત્રોર્મિપટલૈ-
શ્ચલન્મુદ્રાફેનૈર્બહુવિધલસદ્દૈવત ઝષૈઃ ।
ક્રમસ્રોતોભિસ્ત્વં વહસિ પરનાદામૃતનદી
ભવાનિ! પ્રત્યગ્રા શિવચિદમૃતાબ્ધિપ્રણયિની ॥ ૧૪॥

મહીપાથોવહ્નિશ્વસનવિયદાત્મેન્દુરવિભિ-
ર્વપુર્ભિગ્રસ્તાંશૈરપિ તવ કિયાનમ્બ! મહિમા ।
અમૂન્યાલોક્યન્તે ભગવતિ! નકુત્રાપ્યણુતરા-
મવસ્થાં પ્રાપ્તાનિ ત્વયિ તુ પરમવ્યોમવપુષિ ॥ ૧૫॥

મનુષ્યાસ્તિર્યઞ્ચો મરુત ઇતિ લોકત્રયમિદં
ભવામ્ભોધૌમગ્નં ત્રિગુણલહરીકોટિલુઠિતમ્ ।
કટાક્ષશ્ચેદત્રક્વચન તવ માતઃ! કરુણયા
શરીરી સદ્યોઽયં વ્રજતિ પરમાનન્દતનુતામ્ ॥ ૧૬॥

કલાં પ્રજ્ઞામાદ્યાં સમયમનુભૂતિં સમરસાં
ગુરું પારમ્પર્યં વિનયમુપદેશં શિવકથામ્ ।
પ્રમાણં નિર્વાણં પરમમતિભૂતિં પરગુહાં
વિધિં વિદ્યામાહુઃ સકલજનનીમેવ મુનયઃ ॥ ૧૭॥

પ્રલીને શબ્દૌઘે તદનુ વિરતે બિન્દુવિભવે
તતસ્તત્ત્વે ચાષ્ટધ્વનિભિરનુપાધિન્યુપરતે ।
શ્રિતે શાક્તે પર્વણ્યનુકલિતચિન્માત્ર ગહનાં
સ્વસંવિત્તિં યોગી રસયતિ શિવાખ્યાં પરતનુમ્ ॥ ૧૮॥

પરાનન્દાકારાં નિરવધિશિવૈશ્વર્ય વપુષં
નિરાકારજ્ઞાન પ્રકૃતિમનવચ્છિન્નકરુણામ્ ।
સવિત્રીં ભૂતાનાં નિરતિશયધામાસ્પદપદાં
ભવો વા મોક્ષો વા ભવતુ ભવતીમેવ ભજતામ્ ॥ ૧૯॥

જગત્કાયે કૃત્વા તમપિ હૃદયે તચ્ચ પુરુષે
પુમાંસં બિન્દુસ્થં તમપિ પરનાદાખ્યગહને ।
તદેતજ્જ્ઞાનાખ્યે તદપિ પરમાનન્દવિભવે
મહાવ્યોમાકારે! ત્વદનુભવશીલો વિજયતે ॥ ૨૦॥

વિધે વિદ્યે વેદ્યે વિવિધસમયે વેદજનનિ!
વિચિત્રે વિશ્વાદ્યે વિનયસુલભે વેદગુલિકે ।
શિવાજ્ઞે શીલસ્થે શિવપદવદાન્યે શિવનિધે
શિવે માતર્મહ્યં ત્વયિ વિતરભક્તિં નિરુપમામ્ ॥ ૨૧॥

વિધેર્મુણ્ડં હૃત્વા યદકુરુત પાત્રં કરતલે
હરિં શૂલપ્રોતં યદઽગમયદંસાભરણતામ્ ।
અલઞ્ચક્રે કણ્ઠં યદપિ ગરલેનામ્બ ! ગિરિશઃ
શિવસ્થાયાઃ શક્તેસ્તદિદમખિલં તે વિલસિતમ્ ॥ ૨૨॥

વિરિઞ્ચ્યાખ્યા માતઃ! સૃજસિ હરિસંજ્ઞા ત્વમવસિ
ત્રિલોકીં રુદ્રાખ્યા હરસિ વિદધાસીશ્વરદશામ્ ।
ભવન્તી સાદાખ્યા શિવયસિ ચ પાશૌઘદલિની
ત્વમેવૈકાઽનેકા ભવસિ કૃતિભેદૈર્ગિરિસુતે! ॥ ૨૩॥

મુનીનાં ચેતોભિઃ પ્રમૃદિતકષાયૈરપિ મના-
ગઽશક્યે સંસ્પ્રષ્ટું ચકિતચકિતૈરમ્બ! સતતમ્ ।
શ્રુતીનાં મૂર્ધાનઃ પ્રકૃતિકઠિનાઃ કોમલતરે
કથં તે વિન્દન્તે પદકિસલયે પાર્વતિ! પદમ્ ॥ ૨૪॥

તડિદ્વલ્લીં નિત્યામમૃત સરિતં પારરહિતાં
મલોત્તીર્ણાં જ્યોત્સ્નાં પ્રકૃતિમગુણગ્રન્થિગહનામ્ ।
ગિરાં દૂરાં વિદ્યામવિનતકુચાં વિશ્વજનની-
મપર્યન્તાં લક્ષ્મીમભિદધતિ સન્તો ભગવતીમ્ ॥ ૨૫॥

શરીરં ક્ષિત્યમ્ભઃ પ્રભૃતિરચિતં કેવલમિદં
સુખં દુઃખં ચાયં કલયતિ પુમાંશ્ચેતન ઇતિ ।

સ્ફુટં જાનાનોઽપિ પ્રભવતિ ન દેહી રહયિતું
શરીરાહઙ્કારં તવ સમયબાહ્યો ગિરિસુતે! ॥ ૨૬॥

પિતા માતા ભ્રાતા સુહૃદડનુચરઃ સદ્મ ગૃહિણી
વપુઃ પુત્રો મિત્રં ધનમપિ યદા માં વિજહતિ ।
તદા મે ભિન્દાના સપદિ ભયમોહાન્ધતમસં
મહાજ્યોત્સ્ને માતર્ભવ કરુણયા સન્નિધિકરી ॥ ૨૭॥

સુતા દક્ષસ્યાદૌ કિલ સકલમાતસ્ત્વમુદભૂઃ
સદોષં તં હિત્વા તદનુ ગિરિરાજસ્ય તનયા ।
અનાદ્યન્તા શમ્ભોરપૃથગપિ શક્તિર્ભગવતી
વિવાહાજ્જાયાસીત્યહહ ચરિતં વેત્તિ તવ કઃ ॥ ૨૮॥

કણાસ્ત્વદ્દીપ્તીનાં રવિશશિકૃશાનુપ્રભૃતયઃ
પરં બ્રહ્મ ક્ષુદ્રં તવ નિયતમાનન્દકણિકા ।
શીવાદિક્ષિત્યન્તં ત્રિવલયતનોઃ સર્વમુદરે
તવાસ્તે ભક્તસ્ય સ્ફુરસિ હૃદિ ચિત્રં ભગવતિ ॥ ૨૯॥

ત્વયા યો જાનીતે રચયતિ ભવત્યૈવ સતતં
ત્વયૈવેચ્છત્યમ્બ! ત્વમસિ નિખિલા યસ્ય તનવઃ ।
ગતઃ સામ્યં શમ્ભુર્વહતિ પરમં વ્યોમ ભવતી
તથાપ્યેવં હિત્વા વિહરતિ શિવસ્યેતિ કિમિદમ્ ॥ ૩૦॥

પુરઃ પશ્ચાદન્તર્બહિરપરિમેયં પરિમિતં
પરં સ્થૂલં સૂક્ષ્મં સકુલમકુલં ગુહ્યમગુહમ્ ।
દવીયો નેદીયઃ સદસદિતિ વિશ્વં ભગવતીં
સદા પશ્યન્ત્યાજ્ઞાં વહસિ ભુવનક્ષોભ જનનીમ્ ॥ ૩૧॥

મયૂખાઃ પૂષ્ણીવ જ્વલન ઇવ તદ્દીપ્તિકણિકાઃ
પયોધૌ કલ્લોલપ્રતિહતમહિમ્નીવ પૃષતઃ ।
ઉદેત્યોદેત્યામ્બ ત્વયિ સહ નિજૈસ્તાત્ત્વિકકુલૈ-
ર્ભજન્તે તત્ત્વૌઘાઃ પ્રશમમનુકલ્પં પરવશાઃ ॥ ૩૨॥

વિધુર્વિષ્ણુર્બ્રહ્માપ્રકૃતિરણુરાત્માદિનકરઃ
સ્વભાવો જૈનેન્દ્રઃ સુગતમુનિરાકાશમનિલઃ ।
શિવઃ શક્તિશ્ચેતિ શ્રુતિવિષયતાં તામુપગતાં
વિકલ્પૈરેભિસ્ત્વામડભિદધતિ સન્તો ભગવતીમ્ ॥ ૩૩॥

પ્રવિશ્ય સ્વં માર્ગં સહજદયયા દૈશિકદૃશા
ષડધ્વધ્વાન્તૌઘચ્છિદુરગણનાતીતકરુણામ્ ।
પરાનન્દાકારાં સપદિ શિવયન્તીમપિ તનું
સ્વમાત્માનં ધન્યાશ્ચિરમુપલભન્તે ભગવતીમ્ ॥ ૩૪॥

શિવસ્ત્વં શાક્તસ્ત્વં ત્વમસિ સમયા ત્વં સમયિની
ત્વમાત્મા ત્વં દીક્ષા ત્વમયમણિમાદિર્ગુણગણઃ ।
અવિદ્યા ત્વં વિદ્યા ત્વમસિ નિખિલં ત્વં કિમપરં
પૃથક્તત્ત્વં ત્વત્તો ભગવતિ! ન વીક્ષામહ ઇમે ॥ ૩૫॥

અસંખ્યૈઃ પ્રાચીનૈર્જનનિ જનનૈઃકર્મવિલયા-
દ્ભતે જન્મન્યન્તં ગુરુવપુષમાસાદ્ય ગિરિશમ્ ।
અવાપ્યાજ્ઞાં શૈવીં ક્રમતનુરપિ ત્વાં વિદિતવા-
ન્નયેયં ત્વત્પૂજાસ્તુતિવિરચનેનૈવ દિવસાન્ ॥ ૩૬॥

યત્ષટ્પત્રં કમલમુદિતં તસ્ય યા કર્ણિકાખ્યા
યોનિસ્તસ્યાઃ પ્રથિતમુદરે યત્તદોઙ્કારપીઠમ્ ।
તસ્મિન્નઽન્તઃ કુચભરનતાં કુણ્ડલીતઃ પ્રવૃત્તાં
શ્યામાકારાં સકલજનનીં સન્તતં ભાવયામિ ॥ ૩૭॥

ભુવિ પયસિ કૃશાનૌ મારુતે ખે શશાઙ્કે
સવિતરિ યજમાનેઽપ્યષ્ટધા શક્તિરેકા ।
વહતિ કુચભરાભ્યાં યા વિનમ્રાપિ વિશ્વં
સકલજનનિ! સાત્વં પાહિ મામિત્યવશ્યમ્ ॥ ૩૮॥

ઇતિ શ્રીધર્માચાર્યકૃતૌ શ્રી પઞ્ચસ્તવ્યાં સકલજનનીસ્તવઃ પઞ્ચમઃ સમાપ્તઃ । ૫

ઇતિ પઞ્ચસ્તવી સમાપ્તા ।

*Shri Panchastavi*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*